**सूत्रभिद्** पु० सूत्रं भिनत्ति सूच्या, भिद–क्विप्। सूच्याजीवे (दरजी) शब्दर० । [शब्दच०।

**सूत्रमध्यभू** पु० सूत्रमध्यमिव भवति भू–क्विप्। यक्षधूपे

**सूत्रयन्त्र** न० सूत्रवापनं यन्त्रम् शाक०। (ताँत) सूत्रवापनयन्त्रे शब्दमा० । [हारा०।

**सूत्रला** स्त्री सूत्रं लाति–ला–क। तर्कुटग्राम् (टेको)

**सूत्रवीणा** स्त्री सूत्रबद्धा वीणा शाक० । वीणाभेदे हारा०।

**सूत्रवेष्टन** न० सूत्रं वेष्ट्यतेऽनेन वेष्ट–करणे ल्युट्। तन्तुवायोपकरणभेदे तसरे (तासनी) अमरः।

**सूत्रात्मन्** पु० सूत्रमिव सर्वानुस्यूत आत्मा स्वरूपं यस्य। समष्ट्युपहितचैतन्ये हिरण्यगर्भे वेदान्तसा० । [पत्तिः।

**सूत्रामन्** पु० इन्द्रे अमरे पाठान्तरम्। सुत्रामन् शब्दे व्युत्

**सूत्राली** स्त्री ६त० । १सूत्रश्रेणौ २गलमेखलायां हारा०।

**सूत्रिन्** त्रि० सूत्र+अस्त्यर्थे इनि। १सूत्रविशिष्टे स्त्रियां ङीप्। २काके पु० त्रिका० ।

**सूद** पु० सूदयति पशून् पाकार्थं सूद–अच्। १सूपकारके २व्यञ्जनभेदे सूपे अमरः। ३सारथ्ये ४अपराधे ५लोध्रे ६पापे च अजयः। [च।

**सूदन** न० सूद–भावे ल्युट्। १हिंसने २निःक्षेपे ३अङ्गीकारे

**सूदशाला** स्त्री सूदाधिष्ठिता शाला शाक०। पाकशालायाम् पाचकशब्दे ४२४६ पृ० विवरणम्।

**सूदाध्यक्ष** पु० ६त०। पाकशालाध्यक्षे तल्लक्षणं यथा "अनाहार्य्यः शुचिर्दक्षश्चिकित्सितविदांवरः। सूदशास्त्रविशेषज्ञः सूदाध्यक्षः प्रशस्यते" पाचकशब्दे तल्लक्षणादि ४२८६ पृ० दृश्यम्।

**सून** न० सू–क्त तस्य नः। १पुष्पे २प्रसवे च। कर्त्तरि–क्त। ३विकसिते त्रि० मेदि० ४जाते च।

**सूना** स्त्री सू–क्त तस्य नः। १प्राणिवध स्थाने "पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः। कण्डनी चोदकुम्भश्च" मनुः २तनयायां ३गलशुण्डायां मेदि० ४मांसविक्रये च संक्षिप्तसा० । [५कन्यायां स्त्री वा ङङ् हेमच०।

**सूनु** पु० सू–नुक्। १पुत्रे २अनुजे ३सूर्य्ये मेदि० ४अर्कवृक्षे च।

**सूनृत** न० सुन्दयति अनेन सु–नृत–घञर्थे क। १सत्ये प्रिये वाक्ये अमरः। २मङ्गले च ३तद्वति त्रि० अमरः।

**सूप** पु० सुखेन पीयते सु+पा–घञर्थे क पृषो०। (दालि) व्यञ्जनभेदे कृतान्नशब्दे २१८१ पृ० दृश्यम्। सुवपति सु+वप–मूलवि० क। २सूपकारे पाचके मेदि०। आधारे क। ३भाण्डे। सूद–करणे क पृषो०। ४सायके शब्दर०।

**सूपकार** त्रि० सूपं करोति कृ–अण्। पाचके अमरः। पाचकशब्दे ४२८६ पृ० दृश्यम्।

**सूपधूपन** न० सूपो धूप्यतेऽनेन धूप–करणे ल्युट्। १हिङ्गौ त्रिका० सूपपाके हि हिङ्गुधूपदानं पाकशास्त्रे प्रसिद्धम्।

**सूपपर्णी** स्त्री सूपसाधनस्य मुद्गस्येव पर्णमस्याः ङीप्। मुद्गपर्ण्यां रत्नमा०।

**सूपश्रेष्ठ** पु० सूपेषु तत्साधनेषु श्रेष्ठः। मुद्गे राजनि०।

**सूपाङ्ग** न० सूपस्य तत्संस्कारकमङ्गमुपकरणम्। हिङ्गौ राजनि०।

**सूम** न० सू–मक् १आकाशे २क्षीरे मेदि०। ३जले शब्दर०।

**सूर** पु० सुवति प्रेरयति कर्मणि लोकानुदयेन सू–क्रन्। १सूर्य्ये २अर्कवृक्षे च अमरः। सूर–क। ३पण्डिते ४जिनभेदे पु० हेमच०। "सूर्य्योदयं विना नैव स्नानदानादिका क्रिया" स्मृत्युक्तेस्तस्योदयेन लोकानां सर्वकर्मप्रवर्त्तकत्वात्तथात्वम्।

**सूरण** पु० सूर–ल्युट्। शूरणे (ओल) शब्दरत्ना०। "मकरे मूलकञ्चैव सिंहे चालाबुकं तथा। कार्त्तिके (सू)शूरणञ्चैव सद्यो गोमांसभक्षणम्" कर्मलो०।

**सूरत** त्रि० सु+रम–क्त पृषो०। दयालौ अमरः।

**सूरसूत** पु० ६त०। अरुणे गरुडाग्रजे सूर्य्यसारथौ अमरः। अनूरुशब्दे १९१ पृ० दृश्यम्।

**सूरि** पु० सू–क्रिन्। १सूर्य्ये २अर्कवृक्षे ३यादवभेदे ४पण्डिते च अमरः "सदा पश्यन्ति सूरयः" इति श्रुतिः। ४राजसर्षपे स्त्री ङीप् रत्नमा०।

**सूरिन्** पु० सूर–णिनि। पण्डिते शब्दर०।

**सू(षू)र्क्ष(र्क्ष्य)** अनादरे भ्वा०पर०सक०सेट्। सूर्क्ष(र्क्ष्य)ति असूर्क्षी(र्क्ष्यी)त् षोपदेश एव न्याय्यः।

**सूर्क्ष** पु० सूर्क्ष–कर्मणि घञ्। माषे (कलाइ) शब्दर०।

**सूर्क्ष(र्क्ष्य)ण** न० सूर्क्ष(र्क्ष्य) भावे ल्युट्। अनादरे।

**सूर्प** पुंन०। शूर्प–पृषो० शस्य सः। १शूर्पशब्दार्थे शब्दर०। २कुम्भपरिमाणे ३द्रोणपरिमाणे च वैद्यकम्।

**सूर्पणखा** स्त्री शूर्पं इव नखा अस्याः पृषो० शस्य सः णत्वम्। रावणभगिन्याम्।

**सूर्म्मि** स्त्री शूर्मि+पृषो० शस्य सः। शूर्मिशब्दार्थे वा ङीप्।

**सूर्य्य** पु० सृ–क्यप् नि०। १दिवाकरे २अर्कवृक्षे च अमरः। ३दानवभेदे वह्निपु० ४अर्कपर्णवृक्षे मेदि०।

सूर्य्यग्रहकक्षादिकं खगोलशब्दे २४२५ पृ० दृश्यम्। तस्य प्रकृतिस्वरूपादिकं सदार्थचि० उक्तं यथा